Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११५९ - घ

Title रुद्रयामलतंत्रे आपदुद्धारकाख्य (म

Author

Extent १४ Age

Subject स्तोत्रम् · अपूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

९८ - ९७

नं० १८४८ - घ

रुद्रयामलतंत्रे आपदुद्धारकाख्यं बटुकभैरवस्तोत्रम्

नं० ११५५ - च

पत्राणि १४ (अपूर्णम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१

ॐ श्रीगणेशाय नमः ॥ ॐ नमः श्रीवटु
कायनमः ॥ मेरुपृष्ठे सुखासीनं देवदेवं ज
गद्गुरुं ॥ शंकरं परिपप्रछ पार्वती परमेश्वरं
॥१॥ श्री पार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्व
शास्त्रागमादिषु ॥ आपदुद्धारणं मंत्रं सर्व-
सिद्धिप्रदं नृणां ॥२॥ सर्वेषां चैव भूतानां हिता

२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र्थंवांछितंमया ॥ विशेषतस्तुराज्ञांवैशांतिपु
ष्टिप्रसाधनं ॥ ३ ॥ अंगन्यासकरंन्यासेदेह
न्याससमन्वितं ॥ वक्तुमर्हसिदेवेशममहर्ष
विवर्द्धनं ॥ ४ ॥ ईश्वरोवाच ॥ शृणुदेविमहा
मंत्रमापदुद्धारहेतुकं ॥ सर्वदुःखप्रशमनं
सर्वशत्रुविनाशनं ॥ ५ ॥ अपस्मारादिरोगा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२

णांज्वरादीनांविशेषतः नाशनंस्मृति
मात्रेणमंत्रराजमिमंप्रिये ६ ग्रहभूत
पिशाचानांनाशनंसुखवर्द्धनं स्नेहाद्दत्ता
मितेमंत्रः सर्वसारमिमंप्रिये ७ सर्वकामा
र्थिदंमंत्रराज्यभोगप्रदंनृणां आपदुद्धा
रणायैनंमंत्रराजमिमंप्रिये ८ प्रणवं

२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वैमुद्धृत्यदेवीप्रणवमुद्धरेत् वटुकायेति
वैपश्चादापदुद्धारणायच ९ कुरुद्वयंततः
पश्चाद्वटुकायपुनर्वदेत् देवीप्रणवमुद्धृत्य
मंत्रोद्धारमिमंप्रिये १० मंत्रोद्धारमिमंदेवी
त्रैलोक्यस्यापिदुर्ल्लभं अप्रकाश्यंपमिमंमंत्रं
सर्वशक्तिसमन्वितं ११ स्मरणादेवमंत्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६

स्यभूतप्रेतपिशाचकाः विद्रवंत्यतिभी
तावैकालरुद्रादिवप्रजा १२ पठेद्वापा
ठयेद्वापिपूजयित्वापिपुस्तकं नाग्निचौ
रभयंतत्रग्रहराजभयंतथा १३ नचमा
रिभयंकिंचित्सर्वत्रसुखवान्भवेत् आ
युरारोग्यमैश्वर्यंपुत्रपौत्रादिसंपदः १४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भवंतिसकलास्तस्यपुस्तकस्यापिपूजनात्
श्रीपार्वत्युवाच कएषभैरवोनामश्रा
पदुद्धारकोत्तमः १५ त्वयाचकथितोदे
वीभैरवःकल्पवृक्षोत्तमः तस्यनामसहस्रा
दा णिप्रयुतान्यर्बुदानिच १६ सारमुद्धृत्यते
षांवैनामाष्टशतमुत्तमं येषांसंकीर्त्तयन्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४

मन्त्रीः सर्वदुःखविवर्जितः सर्वान्कामा
५ नवाप्नोति साधकः सिद्धिमेवच ईश्वरो
वाच शृणु देवि प्रवक्ष्यामि भैरवस्य महात्म
नः १८ आपदुद्धारकस्येदं नामाष्टशत
मुत्तमं सर्वपापहरं पुण्यं सर्वोपद्रवनाश
नं १९ सर्वकामार्थदं देवि साधकानां सु

४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्वावहं सर्वमंगलमांगल्यंसर्वपापनिवा
रणं २० आयुष्करंपुष्टिकरंश्रीकरं
चयशस्करं नाम्नामष्टशतस्यास्य छंदो
नुष्टुप्प्रकीर्त्तितः २१ बृहदारण्यकोनाम
ऋषिर्देवोथभैरवः भैरवंमूर्द्धिविन्यस्य
ललाटेभीमदर्शनं २२ ॥ नेत्रयोर्भूत

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५

भूतहननंसारमेयानुगंभुवौ कर्णयोर्भू
तनाथंच प्रेतनाथंकपोलयोः २३ नाशा
पुटोष्ठयोश्चैवभस्मांगंसर्पभूषणं श्म
नादिभूतमास्येच शाकिहस्तंगलेन्यसेत् ॥
२४ स्कंधयोर्दैत्यहननंबाह्वोरतुलतेजसं
पाण्योः कपालिनंन्यस्य हृदयेमुंडमालिनं ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२५ शांतंवत्सस्यलेमयमस्तमेनयोःकाम
चारिणं उदरेचसदानुष्टं क्षेत्रेशंपार्श्वयो॰
स्तथा २६ क्षेत्रपालंपृष्ठदेशेक्षेत्रेशंना
भिदेशके गुह्येरत्नाकरंन्यस्यतथोर्वेरक्त
लोचनं २७ जानुनोर्धुर्धुराराववंजंघयोर
क्तपादुकं गुल्फयोःपादुकासिद्धंपादपृष्ठे
सुरेश्वरं २८ आपादमस्तकंचैवआप

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६

डङ्कारहेतुकं रुद्रं डमरुहस्तं च दक्षिणे दंड

धारणं २९ खड्गहस्तं पश्चिमायां घंटावा

घंतघोन्नरे आगनय्यामग्नि वर्णं च नैऋतां

च दिगंबरं ३० वायव्यां सर्वभूतस्वामीशा

न्यां चाष्टसिद्धिदं ऊर्द्धे खेचारिणं मस्पाता

लेरौद्ररूपिणं ३१ एवं विन्यस्य देहेषु षडंगे

षुततो न्यसेत् रुद्रमंगुष्ठयोः मस्पतर्ज्ज

६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मोस्तु सितोवीसुरवं ३२ शिवमध्यामयो
मस्पनाभिकोस्तु त्रिशूलिनं ब्रह्माणंतु
कनिर्घ्यंतालयो त्रिपुरांतकं ३३ मोसा
शिनंकरायेतु करपृष्ठे दिगंबरं हृदयेभ्र
तनाथाय आदिनाथायमूर्द्धनि ३४ मा
नंदप्रदपूर्वायनाथाधयाय सिरवास्तु च ॥
सिद्धसाधकनाथायकवचे विन्यसेत्तथा ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

७

सहस्रानंदनाथाय नमः सेन्नेत्रत्रयेत था नीसी
मानंदनाथाय अस्त्राय च प्रयोजयेत् ३६
एवंन्यासविधिं कृत्वा यथावत्तदनंतरं ध्या
नं तस्य प्रवक्ष्यामि यथा ध्यात्वा पठेन्नरः ॥
३७ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्च
सं नीलजीमूतसंकाशं नीलांजनसमप्र
भं ३८ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विवा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ दंष्ट्राकरालवदनं नृभुरारावसंकु
लं ३९ भुजंगभैरवलं देवमग्निवर्णं तिरो
रोरुहं दिगंबरं कुमारेशं वटुकाख्यं महाब
लं ४० खट्वांगमधुपात्रं च शूलं दक्षिण
भागतः डमरुं च कपालं वरदं भुजगं तथा च
४१ अग्निवर्णं समोपेतं सारमेयसमन्वि
तं ध्यात्वा जपेत् सुसंहष्टः सर्वान्कामा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

८

नवाप्नुयात् ॥ अथ ध्यानं ॥ वंदे बालस्फटि
कसदृशं कुंडलोल्लासिवक्त्रं दिव्यैः कल्पै
र्नवमणिमयैः किंकणीनूपुराद्यैः दीप्ता
कारं विशदवदनं सुप्रसन्नं त्रिनेत्रं हस्ता
भ्यां वीवटुकमनिशं शूलखड्गौ दधानं ॥ इ
ति सात्विकं ॥ उद्यद्भास्करसन्निभं त्रिनय
नं रक्तांगरागस्रजं स्मेरास्यं वरदं कपाल

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मभयंमूलंदधानंकरैः नीलग्रीवमु
दारकौस्तुभधरंश्रीतांशुचूडोज्वलं वं
धूकारणवासमंभयहरंदेवंसदाभावये
इतिराजसं॥ ध्यायेन्नीलाद्रिकांतंशशिश्री
सकलधरंमुंडमालंमहेशं दिग्वस्त्रंपिं
गकेशंडमरुमथसृणिंखड्गपाशाभया
नि नागंघंटांकपालंकरसरसिरुहैर्वि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

६
१

भ्रतंभीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मत्तौघयविलसत्किंकिणीनूपुराढ्यं इतितामसं ॥ ॐ अस्य श्री आपदुद्धारवटुकभैरवस्तोत्रमंत्रस्य बृहदारण्यको नाम ऋषिः श्रीभैरवो देवता अनुष्टुप्छंदः ह्रीं बीजं वटुकायेति शक्तिः प्रणवकीलकं मम सर्वाभिष्टसिद्ध्यर्थे पाठे विनियोगः अथकार

म०

६

मोसः॥ ॐ ह्रांवां अंगुष्ठाभ्यांनमः ॐ ह्रींवीं
तर्ज्जनीभ्यांनमः ॐ ह्रूंवूं मध्यमाभ्यांनमः
ॐ ह्रैं वैं अनामिकाभ्यांनमः ॐ ह्रौं वौं कनि
ष्ठिकाभ्यांनमः ॐ ह्रः वः करतलकरपृष्ठा
भ्यांनमः ॐ ह्रांवां हृदयाय नमः ॐ ह्रीं वीं
शिरसेस्वाहा ॐ ह्रूं वूं शिखायैवौषट् ॐ ह्रैं
वैं कवचायहुं ॐ ह्रौं वौं नेत्रत्रयायवौषट्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ ह्रः वः अस्त्राय फट् इति षडंगन्यासः

करकलितकपालिकुंडली दंडपाणिस्तरुण

माल तिमिरनीलव्यालयज्ञोपवीति क्रतुसमयसपर्या

विघ्नविच्छेदहेतुः जयतिवटुकनाथ

सिद्धिदः साधकानां ४१ अथ मंत्रः॥

ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु व

टुकाय ह्रीं ॐ भैरवो भूतनाथश्च भूतात्मा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भूतभावनः क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्र॰
दः क्षत्रियो विराट् ४८ श्मसानवासी मां
साशी खर्पशाशी स्मरांतकृत् रक्तपः पान
पः सिद्धः सिद्धिदः सिद्धसेवितः ४९ कं
कालः कालशमनः कलाकाष्ठातनुः क॰
विः त्रिनेत्रो बहुनेत्रश्च तथा पिंगललो
चनः ५० शूलपाणिः खड्गपाणिः क

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥

पालीधूम्रलोचनः अभीरुर्भैरवीनाथो
भूतपायोगिनीपतिः ५१ धनदोधनहा
रीचधनवान्प्रतिभानवान् नागहारोना
गपाशोव्योमकेशः कपालभृत् ५२ का
लः कपालमालीचकमनीयकलानिधिः
त्रिलोचनोज्वलन्नेत्रस्त्रिशिखीचत्रिलोक
पः ५३ त्रिनेत्रतनयोडिंभः शांतः शांत

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

जनप्रियः वटुकोवहुवेषश्चखट्वांगवर
धारकः ५४ भूताध्य[illegible]त्तः पशुपति
र्भिक्षुकः परिचारकः धूर्त्तोदिगंबरः शू
लीहरिणीपांडुलोचनः ५५ प्रशांतः शां
तिकृत्सुद्धः शंकरप्रियबांधवः अष्ट
मूर्त्तिर्निधीशाश्चज्ञानचक्षुस्तपोमयः ५६
अष्टाधारषडाधारसर्वयुक्तशि[illegible]तीम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

खः भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ५७ कंकालधारी मुंडी च व्यं
त्रयज्ञोपवीतिवान् जृंभणो मोहनस्तंभी मारणः क्षोभणस्तथा ५८ शुद्धो नीलां
जनप्रख्यो दैत्यहा मुंडभूषितः बलिभुक्
बलिभद्राध्यो बालो बालपराक्रमः ५९
सर्वापत्तारणा दुर्गो दुष्टभूतनिषेवितः का

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मीकलानिधिः कांतः कामिनीवेधक्
दशी ६० सर्वसिद्धिप्रदोवेधः प्रभुर्वि
भुरितीवहि अथोत्तरशतंनाम्नांभैरव
स्यमहात्मनः ६१ मयातेकथितंदेवीरह
स्यंसर्वकामिकं यइदंपठतेस्तोत्रंनामाष्ट
शतमुत्तमं ६२ नतस्यदुरितंकिंचिन्ना
मुपान्मानवःकश्चित् पातकानांभयंचे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१३
13

वपठेत्स्तोत्रमनुत्तमं ६३ मारीभयेराज
भयेतथाचौराग्निजेभये औत्पातिकेम
हाघोरेतथादुःस्वप्नजेभये ६४ बंधनेच
तथाघोरेपठेद्यःस्तोत्रमुत्तमं सर्वप्रशम
मायातिभयंभैरवकीर्त्तनात् ६५ एकाद
शसहस्रंतुपुरश्चरणमुच्यते यस्त्रिसंध्यं
पठेद्देविसंवत्सरमतंद्रितः ६६ सर्वसिद्धिं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्राप्नुयाद्दिव्यं दुर्ल्लभमपि मानवः षण्मासा
द्भूमिकामस्तु जपित्वा प्राप्नुयान्महीं ६७ राज
शत्रुविनाशार्थं जपेन्मासाष्टकं यदि रात्रौ वा
रत्रयं चैव नाशयत्येव शात्रुवान् ६८ जपेन्मा
सत्रयं रात्रौ राजानं वशमानयेत् धनार्थी
वालकार्थी वा दारार्थी यस्तु मानवः जपे
न्मासत्रयं देवि वारमेकं तथा निशि धनं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२५ 14

ॐ स्तवो व्याघ्रात्मा ज्ञात्वा ज्ञानात्र संशयः ॥
रोगी रोगात्प्रमुच्येत तद्विसत्यं न संशयः
श्री निगडैर्मुपि वद्धो यः कैरं ग्रहनिपातितः
सं खल्लो वेधनं प्राप्ना पठे द्वेवद्दिवा निशि
यान्यान्समीहयेत्कामो स्तांस्तां प्राप्नोत्यसं
शयः अप्रकाशं परं गुह्यं न देयं यस्य
कस्यचित् कुलीनाय प्र शांताय ऋजवे २५